# Kailasakshetre Shambhuparvativigrahavarnanam

# કૈલાસક્ષેત્રે શમ્ભુપાર્વતીવિગ્રહવર્ણનમ્

## Document Information

Text title : Shambhu Parvati Vigraha VarNanam

File name : shambhupArvatIvigrahavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 25 | 1-23||

Latest update : September 15, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# કૈલાસક્ષેત્રે શમ્ભુપાર્વતીવિગ્રહવર્ણનમ્

॥ હિમાવન્પ્રતિ સ્કન્દપ્રોક્તં કૈલાસક્ષેત્રે શમ્ભુપાર્વતીવિગ્રહવર્ણનમ્ ॥

(શિવરહસ્યાન્તર્ગતે કૈલાસદર્શનમ્ - ૪)

સ્કન્દ ઉવાચ -

તતો હિમાદ્રિદેવેશં કૈલાસામલસૌધગમ્ ।
પાર્વત્યા સહિતં શમ્ભું દિવ્યસિંહાસને સ્થિતમ્ ॥ ૨૫.૧॥

ચતુર્ભુજમુદારાઙ્ગં સર્વરત્નવિભૂષિતમ્ ।
કિરીટકોટિગોદ્ભાસિ ચન્દ્રર્ધકૃતશેખરમ્ ॥ ૨૫.૨॥

કુણ્ડલાયિતકર્ણોદ્યત્કુણ્ડલીફણિભૂષણમ્ ।
નવરત્નાઙ્ગદલસત્કઙ્કણાઙ્ગદમુદ્રિતમ્ ॥ ૨૫.૩॥

સોમધામસમાનાસ્યં તપનાનલલોચનમ્ ।
ધૃતત્રિપુણ્ડ્રરચનાતદધસ્તિલકોજ્જ્વલમ્ ॥ ૨૫.૪॥

ઉત્ફુલ્લરક્તકમલરત્નમાલાધરં વિભુમ્ ।
દિવ્યચન્દનલિપ્તાઙ્ગં દિવ્યપુષ્પાર્ચિતાઙ્ઘ્રિકમ્ ॥ ૨૫.૫॥

ધૂપિતં પરિતો ધૂપૈસ્તગરાગરુસમ્ભવૈઃ ।
શુદ્ધામ્બરધરં સૌમ્યં પશ્યન્તમનિશં શિવામ્ ॥ ૨૫.૬॥

મણિહર્મ્યચ્છવિપ્રોદ્યદ્દીપ્તકૈલાસપર્વતમ્ ।
વામાઙ્કસન્નિવિષ્ટામ્બાવદનસ્મિતકાન્તિભિઃ ॥ ૨૫.૭॥

ધાવલ્યતરનિર્યચ્છ્રીદેવ્યઙ્ગ(ઙ્ગે)પ્રભયા તતમ્ ।
નમ્રાનનાં મહાદેવીં શિવાઙ્કસ્થાં મહેશ્વરીમ્ ॥ ૨૫.૮॥

ભસ્મત્રિપુણ્ડ્રનિટિલાં કસ્તુરીતિલકોજ્જ્વલામ્ ।
બિમ્બાધરાં પ્રસન્નાસ્યલલન્નાસાગ્રમૌક્તિકામ્ ॥ ૨૫.૯॥

મુકુટોદ્ભાસિચન્દ્રાઙ્કાં કચબદ્ધસુમલ્લિકામ્ ।

તપનોડુપવિભ્રાજિતાટઙ્કયુગલશ્રવામ્(શ્રિયમ્) ॥ ૨૫.૧૦॥

મણિહીરાચ્છપદકલસદ્ગ્રીવા(વાં) મનોહરામ્ ।
કનકાઙ્ગદકેયૂરનાગબન્ધવિરાજિતામ્ ॥ ૨૫.૧૧॥

કસ્તૂરીરસપાટીરચન્દ્રચન્દનચર્ચિતામ્ ।
તામ્બૂલપૂરિતમુખીં તિર્યગ્લોચનકોટિતઃ ॥ ૨૫.૧૨॥

પશ્યન્તી(ન્તીં) વદનામ્ભોજં શમ્ભોઃ સુન્દરમેદુરમ્ ।
સુરમ્યપાદકમલં મુક્તામજ્જીરશોભિતમ્ ॥ ૨૫.૧૩॥

દેવીસખીભિશ્ચ વૃતં ગણેન્દ્રૈશ્ચ મહેશ્વરમ્ ।
મયા ચ ગણપેનાપિ ધૃતચામરવીજિતમ્ ॥ ૨૫.૧૪॥

છત્રૈઃ પતાકાનિચયધારિભિર્ગણપુઙ્ગવૈઃ ।
જયન્તી વિજયાહસ્ત ધૃતચામરવીજિતા(તામ્) ॥ ૨૫.૧૫॥

રમ્યચ્છત્રાવૃતમુખી(ખીં) દણ્ડિન્યાદર્શહસ્તયા ।
વા(બા)લયા વીટિકામત્સ્યપેટીવિધૃતયા તદા ॥ ૨૫.૧૬॥

મુદ્રિણ્યા (મન્ત્રિણ્યા) ખડ્ગકોશોદ્ધત્કરયા સેવિતા શિવા ।
તણ્ડુહસ્તે મહાશૂલં ખડ્ગ(ડ્ગ)કોશઞ્ચ દણ્ડિના ॥ ૨૫.૧૭॥

ભૈરવોદ્ભાવિતમહાનિષઙ્ગવરકાર્મુકૈઃ(કે) ।
કાલાગ્નિરુદ્રો માયૂરવ્યજનેનાપ્યવીજયત્ ॥ ૨૫.૧૮॥

એવં ગણવૃતં દેવં દેવ્યા સિંહ્માસને સ્થિતમ્ ।
દૃષ્ટ્વા પ્રણમ્ય નન્દીશો ગિરિં દેવાય જિજ્ઞિપત્ ॥ ૨૫.૧૯॥

(દૃષ્ટ્વા પ્રણમ્ય નન્દીશો ગિરિદેવં વ્યજિજ્ઞપત્) ॥ ૨૫.૧૯॥

પ્રવેશ્યતામિત્યા(પ્રવેશયેત્યન્વશા)ચ્ચદેવદેવો મહેશ્વરઃ ।
પ્રાઞ્જલિસ્સત્વરં ગત્વા તતોઽગ્રે હિમભૂધરમ્ ॥ ૨૫.૨૦॥

દૃષ્ટ્વા(ઽઽ)યાન્તં સ મૈનાકં દત્તહસ્તઞ્ચ નન્દિના ।
ગૌરીગુરું મહાશૈલં જાતહર્ષં તદા નગમ્ ॥ ૨૫.૨૧॥

પ્રાવેશયચ્ચ સવિધં શમ્ભોર્દેવ્યા ગણાગ્રણીઃ ।
દૃષ્ટ્વા દેવં મહાદેવં સ નગો હર્ષનિર્ભરઃ ॥ ૨૫.૨૨॥

પ્રણમ્ય પ્રાઞ્જલિર્વિપ્રા મમ માતામહોઽદ્રિરાટ્ ।

અગજાપતિમાશાસ્યં તુષ્ટાવ પુલકાઙ્ગકઃ ॥ ૨૫.૨૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે કૈલાસદર્શને હિમાવન્પ્રતિ સ્કન્દપ્રોક્તં કૈલાસક્ષેત્રે શમ્ભુપાર્વતીવિગ્રહવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૨૫ । ૧-૨૩ ॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 25 - . 1-23 ..

Notes
Skanda સ્કન્દ describes to Himāvan હિમાવન્ ; the Resplendent Presence of Śambhū શમ્ભુ and Pārvatī પાર્વતી at Kailāsaśaila કૈલાસશૈલ (Mount Kailāsa), during his guided tour of Kailāsadarshana કૈલાસદર્શન.
Śloka numbering differs amongst the two referenced texts.

Proofread by Ruma Dewan

*Kailasakshetre Shambhuparvativigrahavarnanam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*